# संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्

## जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली, भारतम्

## शोधपत्रप्रेषणाय आमन्त्रणम्

जवाहरलालनेहरूविश्वविद्यालयीयस्य संस्कृत-
प्राच्यविद्याध्ययनसंस्थानस्य रजतजयन्तीसमारोहस्योपलक्ष्ये आयोजिता

**त्रिदिवसीया राष्ट्रियसङ्गोष्ठी (१-३ अक्तूबर, २०२६)**

# संस्कृत-प्राच्यविद्याध्ययनम् : पुनरवलोकनं भाविसम्भावनाश्च
(इतिहास-संस्कृति-दर्शनादीनाञ्च परिप्रेक्ष्ये)





# सङ्गोष्ठी-परिचयः

भारतीयबौद्धिकपरम्परा विश्वस्यातिविस्तृतासु सततप्रवहमानासु च ज्ञानपरम्परासु अन्यतमा। अस्यां ज्ञानपरम्परायां ज्ञानसमाजेतिहाससौन्दर्यबोधराज्यव्यवस्थामानवजीवनस्याभ्युदयादिसम्बद्धानां मूलभूतविषयाणां गहनचिन्तनविमर्शादीनि निरन्तरं प्रवृत्तानि दृश्यन्ते। तत्र संस्कृतस्य स्थानं विशिष्टं महत्त्वपूर्णञ्च वरीवर्ति। आसहस्रेभ्यः वर्षेभ्यः संस्कृतभाषा दार्शनिकचिन्तनस्य, वैज्ञानिकान्वेषणस्य, साहित्यिकसर्जनस्य, सांस्कृतिकाभिव्यक्तेः तथा विद्वत्संवादस्य च प्रमुखमाध्यमत्वेन प्रतिष्ठितास्ति। तथैव इयम् अमरवाणी भारतीयविद्याध्ययनगतानां विविधभाषाणां ग्रन्थपरम्पराणां प्रादेशिकज्ञानपरम्पराणां तथैव सांस्कृतिकाचाराणाञ्च समन्वयं करोति, येषां सभ्यतागतानुभवैः भारतस्य अतीतं व्यतीतमासीत्।

जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत-प्राच्यविद्याध्ययनसंस्थानस्य स्थापनायाः पञ्चविंशतिवर्षपूर्तिः अतीतस्य पुनरवलोकनाय भाविदिशासम्भावनादीनाञ्च विचाराय महत्त्वपूर्णमवसरं प्रददाति। अमुं रजतजयन्तीसमारोहम् उपलक्ष्य संस्थानेन २०२६ वर्षस्य अक्तूबरमासस्य प्रथमदिनाङ्कात् आरभ्य तृतीयदिनाङ्कं यावत् "संस्कृत-प्राच्यविद्याध्ययनम् : पुनरवलोकनं भाविसम्भावनाश्च (इतिहास-संस्कृति-दर्शनादीनाञ्च सन्दर्भे)" इति विषयमधिकृत्य त्रिदिवसव्यापिनी राष्ट्रियसङ्गोष्ठी आयोज्यते।

अस्याः सङ्गोष्ठ्याः प्रमुखमुद्देश्यं संस्कृतस्य प्राच्यविद्याध्ययनस्य चैतिहासिकविकासस्य समकालीनमहत्त्वविवेचनपूर्वकं बौद्धिकाधार-नवीनदिशा-भाविसम्भावनानाञ्चान्वेषणं वर्तते। अत्र 'पुनरवलोकनम्' इत्यस्य अभिप्रायः तेषां ग्रन्थानां, चिन्तकानां, संस्थानां, विमर्शानामध्ययनपद्धतीनाञ्च पुनर्परीक्षणमस्ति, यैः भारतीयबौद्धिकपरम्पराणां स्वरूपं निर्मितं तथाच साम्प्रतिके शैक्षणिकजगत्येतासां परम्पराणामध्ययनदिशा च निर्धारिता। तथैव 'भाविसम्भावना' इत्यनेन शब्देन संस्कृत-प्राच्यविद्याध्ययनयोश्च नवोन्मेषशीलक्षेत्राणामन्तर्विषयकसम्भावनानां, नवीनाध्ययनपद्धतीनां तथाच तादृशानां संस्थागतसंरचनानाञ्च विषये समीक्षात्मकविचारार्थं प्रेरणा प्राप्यते, येन सर्वाणीमानि विषयाणि समकालीनज्ञानविमर्शे शोधकार्ये च सार्थकं योगदानं दातुं शक्नुयुः।

भारतीयदार्शनिकपरम्परासु तत्त्वमीमांसा, ज्ञानमीमांसा, तर्कशास्त्रं, भाषा, नीतिशास्त्रं सौन्दर्यशास्त्रं चाधिकृत्य सुविकसिताः सुव्यवस्थिताश्च चिन्तनपद्धतयः प्रवर्धिताः। शैव-वैष्णव-न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्त-बौद्ध-जैनदर्शनपरम्परासु तथा अन्यास्वपि अनेकासु बौद्धिकज्ञानधारासु ज्ञानस्य स्वरूपं, तस्य सम्भाव्यता, ज्ञानप्राप्तेः साधनानि च अधिकृत्य गम्भीरविमर्शस्य शास्त्रार्थस्य च सुदीर्घा परम्परा सम्प्राप्यते। एताभिः परम्पराभिर्विकसिताः विशिष्टसंकल्पनाः पारिभाषिकशब्दावल्यश्च साम्प्रतिके कालेऽपि नीतिशास्त्रभाषाविज्ञानसंज्ञानाध्ययनसमकालीनदर्शनैः तथा चान्यान्यज्ञानशाखाभिश्च सह सार्थकसंवादस्य विस्तृताः सम्भावनाः उद्घाटयन्ति।



प्राच्यविद्याध्ययनस्यैतिहासिकः आयामोऽप्यत्यन्तं महत्त्वपूर्णः। तत्र ग्रन्थाः, अभिलेखाः, पाण्डुलिपयः, टीका-भाष्य-परम्पराः, मौखिकाख्यानानि, भौतिकसंस्कृतिः, क्षेत्रीय-अभिलेखागाराश्च, एते सर्वे मिलित्वैव भारतस्य ऐतिहासिकानुभवस्य विविधस्तरान् संरक्षन्ति। एतेषां स्रोतसां गहनं, सुव्यवस्थितम्, अन्तर्विषयी-पद्धतिमाध्यमेन च पुनर्परीक्षणं भारतस्य बौद्धिक-सामाजिक-सांस्कृतिक-इतिहासस्य सुसूक्ष्मं बह्वायामिकं च बोधं विकासयितुं सहायकं भवितुम् अर्हति। अत एषा सङ्गोष्ठी ग्रन्थाध्ययनेतिहासलेखन-पुरातत्त्वाभिलेखशास्त्रपाण्डुलिपिविज्ञानान्यान्यसम्बद्धाध्ययनक्षेत्राणां मध्ये सार्थकं संवादं प्रोत्साहयितुं यतिष्यते।

संस्कृत्यध्ययनमपि अस्याध्ययनस्य कश्चन महत्त्वपूर्णः आयामोऽस्ति। भारतीय-ज्ञानपरम्परा कदापि केवलं ग्रन्थे शास्त्रीयवैदुष्ये वा सीमिता नासीत्। तस्याः विचाराः काव्यस्य, नाट्यस्य, सङ्गीतस्य, नृत्यस्य, स्थापत्यस्य, मूर्तिकलायाः, कथापरम्पराणां तथा विविधप्रादेशिकसांस्कृतिकपरम्पराणां माध्यमेन विस्तृतसमाजं जनजीवनं च प्रति प्रसृता, कालानुसारं परिवर्तिता भवति। अनया दृष्ट्या शास्त्रज्ञानं तस्य प्रयोगश्च, तथा ग्रन्थगतज्ञानं जीवनगतः व्यवहारश्च इत्येतयोर्मध्ये सम्बन्धः भारतीय-सभ्यताया निरन्तरतां तस्याः कालानुगुणं जायमानं रूपान्तरणं च बोधयितुं महत्त्वपूर्णं वैचारिकमाधारं ददाति।

समसामयिके परिप्रेक्ष्ये संस्कृतस्य भारतीय-ज्ञानपरम्पराणां च अध्ययनाय अध्ययनपद्धतिषु पुनर्विचारोऽप्यावश्यकः। पाण्डुलिपि-संरक्षणं, समीक्षात्मकसम्पादनम्, अनुवादः, कोशनिर्माणं, सङ्गणकीयमध्ययनं, सुगमज्ञानसङ्ग्रहनिर्माणञ्च, एतानि सर्वाणि शोधस्य नूतनाः दिशाः सम्भावनाश्चोद्घाटयन्ति। सहैव विश्वविद्यालयेषु भारतीयज्ञानपरम्पराणामध्ययनाध्यापनस्य विस्ताराय उच्चस्तरीयशैक्षणिकानुशीलनस्य, अन्तर्विषयीसहयोगस्य, पारम्परिकाध्ययनपद्धति-समसामयिकविधिप्रविधीनाञ्च मध्ये सततसंवादस्यावश्यकतापि अनुभूयते।

एषा सङ्गोष्ठ्येतेषु परस्पर-सम्बद्धेषु विषयेषु विचारविमर्शाय प्रतिष्ठितान् विदुषः, शिक्षकान्, शोधकर्तॄन्, यूनः अध्येतॄंश्च एकस्मिन् मञ्चे आनेष्यति। अस्याः उद्देश्यं केवलं संस्थानस्य शैक्षणिकयात्रायाः उत्सवपालनमेव नास्त्यपितु संस्कृतप्राच्यविद्याध्ययनस्य भविष्यस्य विषये तादृशी परिकल्पनापि वर्तते, यस्यां क्षेत्रमिदमेकं जीवन्तं, गतिशीलं, बौद्धिकदृष्ट्यैकं महत्त्वपूर्णमध्ययनानुशासनं भूत्वा निरन्तरं विकसेत्।

इत्थमस्य रजतजयन्तीमहोत्सवस्यावसरः पञ्चविंशतिवर्षाणां शैक्षणिकोपलब्धीनां विद्वत्परम्परायाश्च पुनर्विचारणेन सह आगामिदशकेभ्यः नूतनाः दिशाः नूतनान्मार्गांश्च प्रशस्तान् कर्तुम् अवसरं प्रदास्यति। भाषादर्शनसाहित्य- संस्कृतीतिहाससौन्दर्यशास्त्रादिसम्बद्धैः विविधविमर्शैरेषा सङ्गोष्ठी भारतस्य बौद्धिकन्यासस्य सततप्रासङ्गिकतां पुनः स्थापयिष्यति तथा च तादृक् नवीनशोधस्य प्रेरणार्थं प्रयत्नं करिष्यति, येन परम्पराप्राप्तज्ञानेन सह समकालिकप्रश्नानां सार्थकसंवादाः स्युः। एषा सङ्गोष्ठी विशेषतः तादृशानि शोधपत्राणि आमन्त्रयति, येषु शोधपत्रेषु मूलस्रोतसां गहनं प्रमाणाधारितञ्चाध्ययनं समन्वितं भवेत्।



# सम्बद्धविषयाः

1. संस्कृत-प्राच्यविद्याध्ययनम् - विषयगतविकासपरम्परा भाविदिशश्च।
2. भारतीयदार्शनिकपरम्पराः - ग्रन्थचिन्तकादिविविधपक्षाः।
3. भारतीयचिन्तने तर्कशास्त्रज्ञानसिद्धान्तः ज्ञानमीमांसाश्च।
4. भाषा, अर्थः भारतीयव्याकरणपरम्परा च।
5. संस्कृत-प्राच्यविद्याध्ययनाय सङ्गणकीयभाषाविज्ञानं कृत्रिमबुद्धिमत्ता च।
6. संस्कृतसाहित्यं साहित्यिकसङ्कल्पनाश्च।
7. भारतीयसौन्दर्यशास्त्रम् - रस-ध्वनि-अलङ्काराः तदितराश्च ।
8. अभिलेखशिलालेखपाण्डुलिप्यभिलेखागारस्रोतांसि च।
9. संस्कृतं प्रादेशिकबौद्धिकपरम्पराश्च।
10. शास्त्राणि तेषां प्रयोगाश्च - ग्रन्थाः, व्यवहाराः सजीवज्ञानपरम्पराश्च।
11. नाट्यशास्त्रं तथा भारतीयनाट्य-नृत्य-सङ्गीतपरम्पराश्च।
12. पूर्वोत्तरभारतस्य ज्ञानपरम्पराः, तासाम् अखिलभारतीयसम्बन्धाश्च।
13. संस्कृतं, प्राकृतं, पालि च - भारतस्य बहुभाषिकबौद्धिकपरिदृश्यम्।
14. अनुवादः, टीकापरम्परा ज्ञानसम्प्रेषणं च।
15. भारतीयज्ञानपरम्परा समसामयिकं मानविक्यध्ययनञ्च।
16. संस्कृत-स्रोतस्सु विज्ञानम्, गणितम्, खगोलविद्या, आयुर्विज्ञानम् अन्यज्ञानपरम्पराश्च।
17. पाण्डुलिपिविज्ञानं, पाठालोचनं समीक्षात्मकसम्पादनं च।
18. भारतीयज्ञानपरम्पराणां संरक्षणं, प्रलेखनं प्रसारणं च।
19. प्राच्यविद्याध्ययनस्यान्तर्विषयकाः तुलनात्मकाश्चोपागमाः।
20. अन्ये सम्बद्धविषयाः।

# शोधसारस्य शोधपत्रस्य च प्रस्तोतुं निर्देशाः

### प्रस्तोतुः विवरणम् :

- लेखकस्य नाम
- सहलेखकस्य नाम (यदि कोऽप्यस्ति)
- संस्थानस्य नाम
- ई-पत्रसङ्केतः सम्पर्कसूत्रं च

### शोधसारः :

- शीर्षकम् : विषयानुरूपम् उचितं शीर्षकं भवेत्।
- शब्दसीमा : अधिकतमं २५०-३०० शब्दाः।
- भाषा : संस्कृतम् / हिन्दी / आङ्ग्लभाषा च।
- विषयवस्तु : ३-५ मुख्यशब्दाः, शोधसमस्यायाः निरूपणम्, शोधपद्धतिः तथा अध्ययनात् प्राप्ताः प्रमुखनिष्कर्षाः।
- शोधसारस्य प्रेषणार्थं निम्नलिखितं Google Form पूरयन्तु : https://forms.gle/devXUXGqX3FUcN6m8

### शोधपत्रम् :

- शब्दसीमा : अधिकतमं २०००-४५०० शब्दाः।
- भाषा : संस्कृतम् / हिन्दी / आङ्ग्लभाषा च।
- प्रारूपम् : शोधपत्रे शोधसमस्याया निरूपणम्, पूर्ववर्ती-उपलब्धसाहित्यस्य समीक्षा, उद्देश्यानि, शोधपद्धतिः, प्राप्तपरिणामाः / निष्कर्षाः, शैक्षणिकनिहितार्थाः, संस्तुतयः, सन्दर्भाश्च समाविष्टाः भवेयुः।
- आङ्ग्लभाषायै अक्षररूपम् : Times New Roman, १२ Point तथा Double Spacing प्रयोज्यम्।
- हिन्दी-संस्कृतभाषाभ्याम् अक्षररूपम् : Nirmala UI अथवा अन्यदुपयुक्तं Unicode-अक्षररूपम्, १२ Point तथा Double Spacing प्रयोज्यम्।
- सन्दर्भशैली : उद्धरणानां कृते Chicago, MLA अथवा APA शैलीषु अन्यतमा शैली प्रयोज्या।
- शोधसारस्य स्वीकृतिसूचनया सह शोधपत्रस्य प्रेषणार्थं सम्पर्कसूत्रमपि प्रदास्यते।



## पञ्जीकरणशुल्कम् :

पञ्जीकरणशुल्कं देयं भविष्यति। देयकसम्बद्धं विवरणं शोधसारस्य स्वीकृतिसूचनाप्राप्त्यनन्तरं प्रेषयिष्यते। अतः सर्वेभ्यः निवेद्यते यत् स्वकीयम् ई-मेलं नियमितरूपेण निरीक्षेरन्।

- छात्राणां शोधच्छात्राणां च कृते - १०००/-
- अध्यापकानाम् अन्येषां च कृते - १५००/-

## महत्त्वपूर्णाः तिथयः :

- शोधसारप्रेषणस्य अन्तिमा तिथिः : **१८ सितम्बर २०२६** (रात्रौ ११:५९ वादनपर्यन्तम्)
- शोधसारस्वीकृतिसूचना : **२२ सितम्बर २०२६** (सायं ०५:०० वादनपर्यन्तम्)
- शोधपत्रप्रेषणं पञ्जीकरणशुल्कस्य देयकञ्च : **२८ सितम्बर २०२६** (सायं ०५:०० वादनपर्यन्तम्)

## ध्यातव्यम् :

- पञ्जीकरणसम्पर्कसूत्रं शुल्कदेयकसम्बद्धं विवरणं च शोधसारस्य स्वीकृतिसूचनया सह प्रेषयिष्यते।
- प्रतिभागिभ्यः यात्राव्ययः, आवासव्यवस्था स्वयमेव व्योढव्या।

## कस्याश्चिदपि सूचनायाः कृते सम्पर्कं कुर्वन्तु :


- **ई-मेलम् :** dean.ssis@mail.jnu.ac.in
- **WhatsApp सम्पर्कसूत्राणि :** ज्योति-पटनायकः 81149 61964, प्राची-ठाकुरः- 8294322783 गौरवः- 7463949854, श्रवणकुमारः- 9599114107


